# संस्कृतवार्ताः

**दिनाङ्क :-24.09.2024** **प्रातः - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्रि-सम्मेलनम्-न्यूयॉर्कनगरे**

प्रधानमन्त्रिणा श्रीमता नरेन्द्रमोदिना निगदितं यत् आङ्ककीय-सार्वजनिक-अवसंरचना सेतुत्वेन भवेत् न तु एका बाधा इति। गतरात्रौ संयुक्तराष्ट्र-महासभायां भविष्यस्य शिखरसम्मेलनं सम्बोधयता श्रीमोदीना प्रतिपादितं यत् वैश्विककल्याणाय भारतं स्वीयां आङ्ककीय-सार्वजनिक-संरचनां विनिमयीकर्तुं सज्जमस्ति। एतदतिरिच्य प्रधानमन्त्रिणा प्रोदीरितं यत् मानवतायाः साफल्यं सामूहिकशक्तौ निहितम् अस्ति, न तु युद्धक्षेत्रे। श्रीमोदी वैश्विक-शान्तिं विकासं च सुनिश्चितुं वैश्विकसंस्थासु परिष्कारान् कर्तुं आग्रहम् अकरोत्। भयोत्पादनस्य, उद्भूतानां सङ्कटानां च विषयं प्रति व्याकुलतां प्रकटयन् प्रधानमन्त्री प्रावोचत् यत् भयोत्पादनं वैश्विकशान्त्यर्थं सुरक्षायै च गभीरा विभीषिका अस्ति इति। सः इदमपि अवदत् यत् आन्तर्जालिक-सुरक्षायाः, सामुद्रिकस्य, अन्तरिक्षस्य च नूतनानि संघर्षक्षेत्राणि उद्भूतानि सन्ति इति। श्रीमोदी वैश्विक-कार्यम् वैश्विक-महत्त्वाकांक्षायाः अनुरूपं भवेत् इत्यस्मै विषयाय अवधानं दत्तवान्।

**प्रधानमन्त्रि-सम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी न्यूयॉर्कनगरे संयुक्तराष्ट्रमहासभायां भविष्यस्य शिखरसम्मेलनं इत्याख्ये स्वीयसम्बोधनावसरे यूक्रेनदेशीयेन राष्ट्रपतिना वोलोदिमीर-ज़ेलेंस्की इत्यनेन साकं सम्वादं साधितवान्। तदनु श्रीमोदी अर्मेनियायाः प्रधानमन्त्रिणा निकोल-पाशिनयानइत्यमुना सह न्यूयॉर्कनगरे च होलीसी इत्यभिनामधेयकस्य राज्यसचिवेन कार्डिनल-पिएत्रो-परोलिन इत्यनेन साकमपि वार्तां विहितवान्। अपि च श्रीमोदी वियतनामदेशीयेन राष्ट्रपतिना टो-लैम-इत्यमुना सार्धं द्विपक्षीयोपवेशनं विहितवान्।

**जम्मू-कश्मीरं-निर्वाचनम्**

जम्मूकश्मीरे विधानसभा-निर्वाचनस्य द्वितीयचरणाय प्रचाराभियानं ह्यः सम्पन्नम्। एतस्मिन् द्वितीये चरणे श्वः राज्यस्यास्य षड्जनपदानां षड्विंशति विधानसभासनेभ्यः मतदानं भविष्यति।

**संसत्-सम्मेलनम्**

दशमं राष्ट्रमण्डल-संसदीय-सङ्घ-भारत-क्षेत्र-सम्मेलनं ह्यः नवदिल्ल्यां समारब्धम्। द्विदिवसीयस्यास्य सम्मेलनस्य अध्यक्षता लोकसभाध्यक्षेण ओम्-बिरला इत्यनेन क्रियते। अत्रावसरे श्रीबिरलाः न्यगादीत् यव् प्रौद्योगिकी सञ्चारमाध्यमश्च जनानां जीवने अभिन्नाङ्गत्वेन अभिज्ञायेते। अपि च विधायिकानां कार्यकुशलतायां कार्यप्रणाल्यां च संशोधनाय प्रौद्योगिकी एका उपयोगिनी सिद्धिकरा च सेतुबन्धा भवेदिति।

**वित्तमन्त्रिणः उज्बेकिस्तान यात्रा**

वित्तमन्त्री निर्मलासीतारामन् इत्येषा अद्यारभ्य उज्बेकिस्तानदेशस्य पञ्चदिवसीययात्रायां भविष्यति। स्वीययात्राकाले वित्तमन्त्री श्वः गुरूवासरे च समरकन्दस्थले एशिया-आधारभूतसंरचना-निवेश-बैंक-इत्येतस्य बोर्ड-ऑफ-गवर्नर्स-इत्यस्य नवमे वार्षिकोपवेशने भागं भजिष्यति। अपि च भारत-उज्बेकिस्तानयोर्मध्ये द्विपक्षीय-निवेशसन्धिपत्रेषु हस्ताक्षरं करिष्यति। वित्तमन्त्री उज्बेकिस्तान-कतर-चीन-देशानां स्वीयैः समकक्षैः सह द्विपक्षीयोपवेशनानि विधास्यति। तदनु सुश्रीसीतारामन् इत्येषा उज्बेकिस्तानस्य राष्ट्रपतिना शावकत-मिर्जियोवेवेन सह मेलनं करिष्यति इति आशास्यते।

**गोयल-ऑस्ट्रेलिया**

ऑस्ट्रेलियादेशस्य निजयात्रायाः प्रथमे दिवसे वाणिज्योद्योगमन्त्री पीयूषगोयलः ह्यः अनेकेषु उपवेशनेषु भागम् अभजत् तथा च नैकेः हितधारकैः सह वार्तां चर्चां च विहितवान्। वाणिज्योद्योगमन्त्रालयेन ख्यापितं यत् श्रीगोयलेन ऑस्ट्रेलियायाः बिजनेस-कॉउंसिल-द्वारा आयोजिते एकस्मिन् कार्यक्रमे भागः स्वीकृतः यस्मिन् ऑस्ट्रेलियादेशीयाः भारतीयाः च प्रमुखकार्यकारी-अधिकारिणः उपस्थिताः आसन्।

**सूचनाप्रसारणमन्त्री-जयपुरं**

केन्द्रीयसूचनाप्रसारणमन्त्री रेलमन्त्री च अश्विनीवैष्णवः अद्य राजस्थानं प्रति गमिष्यति। असौ अद्य जयपुरे जयपुरजनपदस्य भारतीय-जनतापार्टीतिदलस्य कार्यकर्तृभिस्साकं सम्वादं समाचारिष्यति।

**।।इति वार्ताः।।**